# দুর্গাসহস্রনামস্তোত্রম্

{॥ দুর্গাসহস্রনামস্তোত্রম্ ॥}

॥ শ্রীঃ ॥

॥ শ্রী দুর্গায়ৈ নমঃ ॥

॥ অথ শ্রী দুর্গাসহস্রনামস্তোত্রম্ ॥

নারদ উবাচ –

কুমার গুণগম্ভীর দেবসেনাপতে প্রভো ।

সর্বাভীষ্টপ্রদং পুংসাং সর্বপাপপ্রণাশনম্ ॥ ১॥

গুহ্যাদ্গুহ্যতরং স্তোত্রং ভক্তিবর্ধকমঞ্জসা ।

মঙ্গলং গ্রহপীডাদিশান্তিদং বক্তুমর্হসি ॥ ২॥

স্কন্দ উবাচ –

শৃণু নারদ দেবর্ষে লোকানুগ্রহকাম্যযা ।

যৎপৃচ্ছসি পরং পুণ্যং তত্তে বক্ষ্যামি কৌতুকাত্ ॥ ৩॥

মাতা মে লোকজননী হিমবন্নগসত্তমাত্ ।

মেনাযাং ব্রহ্মবাদিন্যাং প্রাদুর্ভূতা হরপ্রিযা ॥ ৪॥

মহতা তপসাঽঽরাধ্য শঙ্করং লোকশঙ্করম্ ।

স্বমেব বল্লভং ভেজে কলেব হি কলানিধিম্ ॥ ৫॥

Stotram Digitalized By Sanskritdocuments.org

নগানামধিরাজস্তু হিমবান্ বিরহাতুরঃ ।

স্বসুতাযাঃ পরিক্ষীণে বসিষ্ঠেন প্রবোধিতঃ ॥ ৬॥

ত্রিলোকজননী সেযং প্রসন্না ত্বযি পুণ্যতঃ ।

প্রাদুর্ভূতা সুতাত্বেন তদ্বিযোগং শুভং ত্যজ ॥ ৭॥

বহুরূপা চ দুর্গেযং বহুনাম্নী সনাতনী ।

সনাতনস্য জাযা সা পুত্রীমোহং ত্যজাধুনা ॥ ৮॥

ইতি প্রবোধিতঃ শৈলঃ তাং তুষ্টাব পরাং শিবাম্ ।

তদা প্রসন্না সা দুর্গা পিতরং প্রাহ নন্দিনী ॥ ৯॥

মৎপ্রসাদাৎপরং স্তোত্রং হৃদযে প্রতিভাসতাম্ ।

তেন নাম্নাং সহস্রেণ পূজযন্ কামমাপ্নুহি ॥ ১০॥

ইত্যুক্ত্বান্তর্হিতাযাং তু হৃদযে স্ফুরিতং তদা ।

নাম্নাং সহস্রং দুর্গাযাঃ পৃচ্ছতে মে যদুক্তবান্ ॥ ১১॥

মঙ্গলানাং মঙ্গলং তদ্ দুর্গানাম সহস্রকম্ ।

সর্বাভীষ্টপ্রদাং পুংসাং ব্রবীম্যখিলকামদম্ ॥ ১২॥

দুর্গাদেবী সমাখ্যাতা হিমবানৃষিরুচ্যতে ।

ছন্দোনুষ্টুপ্ জপো দেব্যাঃ প্রীতয়ে ক্রিয়তে সদা ॥ ১৩॥

ঋষিচ্ছন্দাংসি -

অস্য শ্রীদুর্গাস্তোত্রমহামন্ত্রস্য । হিমবান্ ঋষিঃ ।

অনুষ্টুপ্ ছন্দঃ । দুর্গাভগবতী দেবতা ।

শ্রীদুর্গাপ্রসাদসিদ্ধ্যর্থে জপে বিনিয়োগঃ ।

শ্রীভগবত্যৈ দুর্গায়ৈ নমঃ ।

দেবীধ্যানম্

ওঁ হ্রীং কালাভ্রাভাং কটাক্ষৈররিকুলভয়দাং মৌলিবদ্ধেন্দুরেখাং

শঙ্খং চক্রং কৃপাণং ত্রিশিখমপি করৈরুদ্বহন্তীং ত্রিনেত্রাম্ ।

সিংহস্কন্ধাধিরূঢাং ত্রিভুবনমখিলং তেজসা পূরয়ন্তীং

ধ্যায়েদ্ দুর্গাং জয়াখ্যাং ত্রিদশপরিবৃতাং সেবিতাং সিদ্ধিকামৈঃ ॥

শ্রী জয়দুর্গায়ৈ নমঃ ।

ওঁ শিবাঽথোমা রমা শক্তিরনন্তা নিষ্কলাঽমলা ।

শান্তা মাহেশ্বরী নিত্যা শাশ্বতা পরমা ক্ষমা ॥ ১॥

অচিন্ত্যা কেবলানন্তা শিবাত্মা পরমাত্মিকা ।

অনাদিরব্যয়া শুদ্ধা সর্বজ্ঞা সর্বগাঽচলা ॥ ২॥

একানেকবিভাগস্থা মায়াতীতা সুনির্মলা ।

মহামাহেশ্বরী সত্যা মহাদেবী নিরঞ্জনা ॥ ৩॥

কাষ্ঠা সর্বান্তরস্থাঽপি চিচ্ছক্তিশ্চাত্রিলালিতা ।
সর্বা সর্বাত্মিকা বিশ্বা জ্যোতীরূপাঽক্ষরাঽমৃতা ॥ ৪॥

শান্তা প্রতিষ্ঠা সর্বেশা নিবৃত্তিরমৃতপ্রদা ।
ব্যোমমূর্তির্ব্যোমসংস্থা ব্যোমধারাঽচ্যুতাঽতুলা ॥ ৫॥

অনাদিনিধনাঽমোঘা কারণাত্মকলাকুলা ।
ঋতুপ্রথমজাঽনাভিরমৃতাত্মসমাশ্রয়া ॥ ৬॥

প্রাণেশ্বরপ্রিয়া নম্যা মহামহিষঘাতিনী ।
প্রাণেশ্বরী প্রাণরূপা প্রধানপুরুষেশ্বরী ॥ ৭॥

সর্বশক্তিকলাঽকামা মহিষেষ্টবিনাশিনী ।
সর্বকার্যনিয়ন্ত্রী চ সর্বভূতেশ্বরেশ্বরী ॥ ৮॥

অঙ্গদাদিধরা চৈব তথা মুকুটধারিণী ।
সনাতনী মহানন্দাঽঽকাশযোনিস্তথেচ্যতে ॥ ৯॥

চিৎপ্রকাশস্বরূপা চ মহাযোগেশ্বরেশ্বরী ।
মহামায়া সদুষ্পারা মূলপ্রকৃতিরীশিকা ॥ ১০॥

সংসারযোনিঃ সকলা সর্বশক্তিসমুদ্ভবা ।

সংসারপারা দুর্বারা দুর্নিরীক্ষা দুরাসদা ॥ ১১॥

প্রাণশক্তিশ্চ সেব্যা চ যোগিনী পরমাকলা।
মহাবিভূতির্দুর্দর্শা মূলপ্রকৃতিসম্ভবা ॥ ১২॥

অনাদ্যনন্তবিভবা পরার্থা পুরুষারণিঃ।
সর্গস্থিত্যন্তকৃচ্চৈব সুদুর্বাচ্যা দুরত্যযা ॥ ১৩॥

শব্দগম্যা শব্দমাযা শব্দাখ্যানন্দবিগ্রহা।
প্রধানপুরুষাতীতা প্রধানপুরুষাত্মিকা ॥ ১৪॥

পুরাণী চিন্মযা পুংসামিষ্টদা পুষ্টিরূপিণী।
পূতান্তরস্থা কূটস্থা মহাপুরুষসংজ্ঞিতা ॥ ১৫॥

জন্মমৃত্যুজরাতীতা সর্বশক্তিস্বরূপিণী।
বাঞ্ছাপ্রদাঽনবচ্ছিন্নপ্রধানানুপ্রবেশিনী ॥ ১৬॥

ক্ষেত্রজ্ঞাঽচিন্ত্যশক্তিস্তু প্রোচ্যতেঽব্যক্তলক্ষণা।
মলাপবর্জিতাঽঽনাদিমাযা ত্রিতযতত্ত্বিকা ॥ ১৭॥

প্রীতিশ্চ প্রকৃতিশ্চৈব গুহাবাসা তথোচ্যতে।
মহামাযা নগোৎপন্না তামসী চ ধ্রুবা তথা ॥ ১৮॥

ব্যক্তাঽব্যক্তাত্মিকা কৃষ্ণা রক্তা শুক্লা হ্যকারণা ।
প্রোচ্যতে কার্যজননী নিত্যপ্রসবধর্মিণী ॥ ১৯॥

সর্গপ্রলয়মুক্তা চ সৃষ্টিস্থিত্যন্তধর্মিণী ।
ব্রহ্মগর্ভা চতুর্বিংশস্বরূপা পদ্মবাসিনী ॥ ২০॥

অচ্যুতাহ্লাদিকা বিদ্যুদ্ব্রহ্মযোনির্মহালযা ।
মহালক্ষ্মী সমুদ্ভাবভাবিতাত্মামহেশ্বরী ॥ ২১॥

মহাবিমানমধ্যস্থা মহানিদ্রা সকৌতুকা ।
সর্বার্থধারিণী সূক্ষ্মা হ্যবিদ্ধা পরমার্থদা ॥ ২২॥

অনন্তরূপাঽনন্তার্থা তথা পুরুষমোহিনী ।
অনেকানেকহস্তা চ কালত্রযবিবর্জিতা ॥ ২৩॥

ব্রহ্মজন্মা হরপ্রীতা মতির্ব্রহ্মশিবাত্মিকা ।
ব্রহ্মেশবিষ্ণুসম্পূজ্যা ব্রহ্মাখ্যা ব্রহ্মসংজ্ঞিতা ॥ ২৪॥

ব্যক্তা প্রথমজা ব্রাহ্মী মহারাত্রীঃ প্রকীর্তিতা ।
জ্ঞানস্বরূপা বৈরাগ্যরূপা হ্যৈশ্বর্যরূপিণী ॥ ২৫॥

ধর্মাত্মিকা ব্রহ্মমূর্তিঃ প্রতিশ্রুতপুমর্থিকা ।

অপাংযোনিঃ স্বযম্ভূতা মানসী তত্ত্বসম্ভবা ॥ ২৬॥

ঈশ্বরস্য প্রিযা প্রোক্তা শঙ্করার্ধশরীরিণী ।

ভবানী চৈব রুদ্রাণী মহালক্ষ্মীস্তথাঽম্বিকা ॥ ২৭॥

মহেশ্বরসমুৎপন্না ভুক্তিমুক্তি প্রদাযিনী ।

সর্বেশ্বরী সর্ববন্দ্যা নিত্যমুক্তা সুমানসা ॥ ২৮॥

মহেন্দ্রোপেন্দ্রনমিতা শাঙ্করীশানুবর্তিনী ।

ঈশ্বরার্ধাসনগতা মাহেশ্বরপতিব্রতা ॥ ২৯॥

সংসারশোষিণী চৈব পার্বতী হিমবৎসুতা ।

পরমানন্দদাত্রী চ গুণাগ্র্যা যোগদা তথা ॥ ৩০॥

জ্ঞানমূর্তিশ্চ সাবিত্রী লক্ষ্মীঃ শ্রীঃ কমলা তথা ।

অনন্তগুণগম্ভীরা হ্যুরোনীলমণিপ্রভা ॥ ৩১॥

সরোজনিলযা গঙ্গা যোগিধ্যেযাঽসুরার্দিনী ।

সরস্বতী সর্ববিদ্যা জগজ্জ্যেষ্ঠা সুমঙ্গলা ॥ ৩২॥

বাগ্দেবী বরদা বর্যা কীর্তিঃ সর্বার্থসাধিকা ।

বাগীশ্বরী ব্রহ্মবিদ্যা মহাবিদ্যা সুশোভনা ॥ ৩৩॥

গ্রাহ্যবিদ্যা বেদবিদ্যা ধর্মবিদ্যাঽঽত্মভাবিতা ।

স্বাহা বিশ্বম্ভরা সিদ্ধিঃ সাধ্যা মেধা ধৃতিঃ কৃতিঃ ॥ ৩৪॥

সুনীতিঃ সংকৃতিশ্চৈব কীর্তিতা নরবাহিনী ।

পূজাবিভাবিনী সৌম্যা ভোগ্যভাগ্ ভোগদাযিনী ॥ ৩৫॥

শোভাবতী শাঙ্করী চ লোলা মালাবিভূষিতা ।

পরমেষ্ঠিপ্রিযা চৈব ত্রিলোকীসুন্দরী মাতা ॥ ৩৬॥

নন্দা সন্ধ্যা কামধাত্রী মহাদেবী সুসাত্ত্বিকা ।

মহামহিষদর্পঘ্নী পদ্মমালাঽঘহারিণী ॥ ৩৭॥

বিচিত্রমুকুটা রামা কামদাতা প্রকীর্তিতা ।

পিতাম্বরধরা দিব্যবিভূষণ বিভূষিতা ॥ ৩৮॥

দিব্যাখ্যা সোমবদনা জগৎসংসৃষ্টিবর্জিতা ।

নির্যন্ত্রা যন্ত্রবাহস্থা নন্দিনী রুদ্রকালিকা ॥ ৩৯॥

আদিত্যবর্ণা কৌমারী মযূরবরবাহিনী ।

পদ্মাসনগতা গৌরী মহাকালী সুরার্চিতা ॥ ৪০॥

অদিতির্নিযতা রৌদ্রী পদ্মগর্ভা বিবাহনা ।

বিরূপাক্ষা কেশিবাহা গুহাপুরনিবাসিনী ॥ ৪১॥

মহাফলাঽনবদ্যাঙ্গী কামরূপা সরিদ্বরা ।
ভাস্বদ্রূপা মুক্তিদাত্রী প্রণতক্লেশভঞ্জনা ॥ ৪২॥

কৌশিকী গোমিনী রাত্রিস্ত্রিদশারিবিনাশিনী ।
বহুরূপা সুরূপা চ বিরূপা রূপবর্জিতা ॥ ৪৩॥

ভক্তার্তিশমনা ভব্যা ভবভাববিনাশিনী ।
সর্বজ্ঞানপরীতাঙ্গী সর্বাসুরবিমর্দিকা ॥ ৪৪॥

পিকস্বনী সামগীতা ভবাঙ্কনিলযা প্রিযা ।
দীক্ষা বিদ্যাধরী দীপ্তা মহেন্দ্রাহিতপাতিনী ॥ ৪৫॥

সর্বদেবমযা দক্ষা সমুদ্রান্তরবাসিনী ।
অকলঙ্কা নিরাধারা নিত্যসিদ্ধা নিরামযা ॥ ৪৬॥

কামধেনুবৃহদ্গর্ভা ধীমতী মৌননাশিনী ।
নিঃসঙ্কল্পা নিরাতঙ্কা বিনযা বিনযপ্রদা ॥ ৪৭॥

জ্বালামালা সহস্রাঢ্যা দেবদেবী মনোমযা ।
সুভগা সুবিশুদ্ধা চ বসুদেবসমুদ্ভবা ॥ ৪৮॥

মহেন্দ্রোপেন্দ্রভগিনী ভক্তিগম্যা পরাবরা ।

জ্ঞানজ্ঞেযা পরাতীতা বেদান্তবিষযা মতিঃ ॥ ৪৯॥

দক্ষিণা দাহিকা দহ্যা সর্বভূতহৃদিস্থিতা ।

যোগমাযা বিভাগজ্ঞা মহামোহা গরীযসী ॥ ৫০॥

সন্ধ্যা সর্বসমুদ্ভূতা ব্রহ্মবৃক্ষাশ্রিযাঽদিতিঃ ।

বীজাঙ্কুরসমুদ্ভূতা মহাশক্তির্মহামতিঃ ॥ ৫১॥

খ্যাতিঃ প্রজ্ঞাবতী সংজ্ঞা মহাভোগীন্দ্রশাযিনী ।

হ্রীংকৃতিঃ শঙ্করী শান্তির্গন্ধর্বগণসেবিতা ॥ ৫২॥

বৈশ্বানরী মহাশূলা দেবসেনা ভবপ্রিযা ।

মহারাত্রী পরানন্দা শচী দুঃস্বপ্ননাশিনী ॥ ৫৩॥

ঈড্যা জযা জগদ্ধাত্রী দুর্বিজ্ঞেযা সুরূপিণী ।

গুহাম্বিকা গণোৎপন্না মহাপীঠা মরুৎসুতা ॥ ৫৪॥

হব্যবাহা ভবানন্দা জগদ্যোনিঃ প্রকীর্তিতা ।

জগন্মাতা জগন্মৃত্যুর্জরাতীতা চ বুদ্ধিদা ॥ ৫৫॥

সিদ্ধিদাত্রী রত্নগর্ভা রত্নগর্ভাশ্রযা পরা ।

দৈত্যহন্ত্রী স্বেষ্টদাত্রী মঙ্গলৈকসুবিগ্রহা ॥ ৫৬॥

পুরুষান্তর্গতা চৈব সমাধিস্থা তপস্বিনী ।

দিবিস্থিতা ত্রিণেত্রা চ সর্বেন্দ্রিয়মনাধৃতিঃ ॥ ৫৭॥

সর্বভূতহৃদিস্থা চ তথা সংসারতারিণী ।

বেদ্যা ব্রহ্মবিবেদ্যা চ মহালীলা প্রকীর্তিতা ॥ ৫৮॥

ব্রাহ্মণিবৃহতী ব্রাহ্মী ব্রহ্মভূতাঽঘহারিণী ।

হিরণ্ময়ী মহাদাত্রী সংসারপরিবর্তিকা ॥ ৫৯॥

সুমালিনী সুরূপা চ ভাস্বিনী ধারিণী তথা ।

উন্মূলিনী সর্বসভা সর্বপ্রত্যয়সাক্ষিণী ॥ ৬০॥

সুসৌম্যা চন্দ্রবদনা তাণ্ডবাসক্তমানসা ।

সত্ত্বশুদ্ধিকরী শুদ্ধা মলত্রয়বিনাশিনী ॥ ৬১॥

জগত্ত্রয়ী জগন্মূর্তিস্ত্রিমূর্তিরমৃতাশ্রয়া ।

বিমানস্থা বিশোকা চ শোকনাশিন্যনাহতা ॥ ৬২॥

হেমকুণ্ডলিনী কালী পদ্মবাসা সনাতনী ।

সদাকীর্তিঃ সর্বভূতশয়া দেবী সতাংপ্রিয়া ॥ ৬৩॥

ব্রহ্মমূর্তিকলা চৈব কৃত্তিকা কঞ্জমালিনী ।
ব্যোমকেশা ক্রিযাশক্তিরিচ্ছাশক্তিঃ পরাগতিঃ ॥ ৬৪॥

ক্ষোভিকা খণ্ডিকাভেদ্যা ভেদাভেদবিবর্জিতা ।
অভিন্না ভিন্নসংস্থানা বশিনী বংশধারিণী ॥ ৬৫॥

গুহ্যশক্তির্গুহ্যতত্ত্বা সর্বদা সর্বতোমুখী ।
ভগিনী চ নিরাধারা নিরাহারা প্রকীর্তিতা ॥ ৬৬॥

নিরঙ্কুশপদোদ্ভূতা চক্রহস্তা বিশোধিকা ।
স্রগ্বিণী পদ্মসম্ভেদকারিণী পরিকীর্তিতা ॥ ৬৭॥

পরাবরবিধানজ্ঞা মহাপুরুষপূর্বজা ।
পরাবরজ্ঞা বিদ্যা চ বিদ্যুজ্জিহ্বা জিতাশ্রযা ॥ ৬৮॥

বিদ্যামযী সহস্রাক্ষী সহস্রবদনাত্মজা ।
সহস্ররশ্মিঃসত্ত্বস্থা মহেশ্বরপদাশ্রযা ॥ ৬৯॥

জ্বালিনী সন্মযা ব্যাপ্তা চিন্মযা পদ্মভেদিকা ।
মহাশ্রযা মহামন্ত্রা মহাদেবমনোরমা ॥ ৭০॥

ব্যোমলক্ষ্মীঃ সিংহরথা চেকিতানাঽমিতপ্রভা ।

বিশ্বেশ্বরী ভগবতী সকলা কালহারিণী ॥ ৭১॥

সর্ববেদ্যা সর্বভদ্রা গুহ্যা দূঢা গুহারণী ।

প্রলযা যোগধাত্রী চ গঙ্গা বিশ্বেশ্বরী তথা ॥ ৭২॥

কামদা কনকা কান্তা কঞ্জগর্ভপ্রভা তথা ।

পুণ্যদা কালকেশা চ ভোক্ত্ত্রী পুষ্করিণী তথা ॥ ৭৩॥

সুরেশ্বরী ভূতিদাত্রী ভূতিভূষা প্রকীর্তিতা ।

পঞ্চব্রহ্মসমুৎপন্না পরমার্থাঽর্থবিগ্রহা ॥ ৭৪॥

বর্ণোদযা ভানুমূর্তির্বাগ্বিজ্ঞেযা মনোজবা ।

মনোহরা মহোরস্কা তামসী বেদরূপিণী ॥ ৭৫॥

বেদশক্তির্বেদমাতা বেদবিদ্যাপ্রকাশিনী ।

যোগেশ্বরেশ্বরী মাযা মহাশক্তির্মহামযী ॥ ৭৬॥

বিশ্বান্তঃস্থা বিযন্মূর্তির্ভার্গবী সুরসুন্দরী ।

সুরভির্নন্দিনী বিদ্যা নন্দগোপতনূদ্ভবা ॥ ৭৭॥

ভারতী পরমানন্দা পরাবরবিভেদিকা ।

সর্বপ্রহরণোপেতা কাম্যা কামেশ্বরেশ্বরী ॥ ৭৮॥

অনন্তানন্দবিভবা হৃল্লেখা কনকপ্রভা ।

কূষ্মাণ্ডা ধনরত্নাঢ্যা সুগন্ধা গন্ধদাযিনী ॥ ৭৯॥

ত্রিবিক্রমপদোদ্ভূতা চতুরাস্যা শিবোদযা ।

সুদুর্লভা ধনাধ্যক্ষা ধন্যা পিঙ্গললোচনা ॥ ৮০॥

শান্তা প্রভাস্বরূপা চ পঙ্কজাযতলোচনা ।

ইন্দ্রাক্ষী হৃদযান্তঃস্থা শিবা মাতা চ সৎক্রিযা ॥ ৮১॥

গিরিজা চ সুগূঢা চ নিত্যপুষ্টা নিরন্তরা ।

দুর্গা কাত্যাযনী চণ্ডী চন্দ্রিকা কান্তবিগ্রহা ॥ ৮২॥

হিরণ্যবর্ণা জগতী জগদ্যন্ত্রপ্রবর্তিকা ।

মন্দরাদ্রিনিবাসা চ শারদা স্বর্ণমালিনী ॥ ৮৩॥

রত্নমালা রত্নগর্ভা ব্যুষ্টির্বিশ্বপ্রমাথিনী ।

পদ্মানন্দা পদ্মনিভা নিত্যপুষ্টা কৃতোদ্ভবা ॥ ৮৪॥

নারাযণী দুষ্টশিক্ষা সূর্যমাতা বৃষপ্রিযা ।

মহেন্দ্রভগিনী সত্যা সত্যভাষা সুকোমলা ॥ ৮৫॥

বামা চ পঞ্চতপসাং বরদাত্রী প্রকীর্তিতা ।

বাচ্যবর্ণেশ্বরী বিদ্যা দুর্জযা দুরতিক্রমা ॥ ৮৬॥

কালরাত্রির্মহাবেগা বীরভদ্রপ্রিযা হিতা ।

ভদ্রকালী জগন্মাতা ভক্তানাং ভদ্রদাযিনী ॥ ৮৭॥

করালা পিঙ্গলাকারা কামভেত্রী মহামনাঃ ।

যশস্বিনী যশোদা চ ষডধ্বপরিবর্তিকা ॥ ৮৮॥

শঙ্খিনী পদ্মিনী সংখ্যা সাংখ্যযোগপ্রবর্তিকা ।

চৈত্রাদির্বৎসরারূঢা জগৎসম্পূরণীন্দ্রজা ॥ ৮৯॥

শুম্ভঘ্নী খেচরারাধ্যা কম্বুগ্রীবা বলীডিতা ।

খগারূঢা মহৈশ্বর্যা সুপদ্মনিলযা তথা ॥ ৯০॥

বিরক্তা গরুডস্থা চ জগতীহৃদ্গুহাশ্রযা ।

শুম্ভাদিমথনা ভক্তহৃদ্গহ্বরনিবাসিনী ॥ ৯১॥

জগত্ত্রযারণী সিদ্ধসঙ্কল্পা কামদা তথা ।

সর্ববিজ্ঞানদাত্রী চানল্পকল্মষহারিণী ॥ ৯২॥

সকলোপনিষদ্গম্যা দুষ্টদুষ্প্রেক্ষ্যসত্তমা ।

সদ্বৃতা লোকসংব্যাপ্তা তুষ্টিঃ পুষ্টিঃ ক্রিযাবতী ॥ ৯৩॥

বিশ্বামরেশ্বরী চৈব ভুক্তিমুক্তিপ্রদায়িনী ।

শিবাধৃতা লোহিতাক্ষী সর্পমালাবিভূষণা ॥ ৯৪॥

নিরানন্দা ত্রিশূলাসিধনুর্বাণাদিধারিণী ।

অশেষধ্যেযমূর্তিশ্চ দেবতানাং চ দেবতা ॥ ৯৫॥

বরাম্বিকা গিরেঃ পুত্রী নিশুম্ভবিনিপাতিনী ।

সুবর্ণা স্বর্ণলসিতাঽনন্তবর্ণা সদাধৃতা ॥ ৯৬॥

শাঙ্করী শান্তহৃদযা অহোরাত্রবিধাযিকা ।

বিশ্বগোপ্ত্রী গূঢরূপা গুণপূর্ণা চ গার্গ্যজা ॥ ৯৭॥

গৌরী শাকম্ভরী সত্যসন্ধা সন্ধ্যাত্রযীধৃতা ।

সর্বপাপবিনির্মুক্তা সর্ববন্ধবিবর্জিতা ॥ ৯৮॥

সাংখ্যযোগসমাখ্যাতা অপ্রমেযা মুনীডিতা ।

বিশুদ্ধসুকুলোদ্ভূতা বিন্দুনাদসমাদৃতা ॥ ৯৯॥

শম্ভুবামাঙ্কগা চৈব শশিতুল্যনিভাননা ।

বনমালাবিরাজন্তী অনন্তশযনাদৃতা ॥ ১০০॥

নরনারাযণোদ্ভূতা নারসিংহী প্রকীর্তিতা ।

দৈত্যপ্রমাথিনী শঙ্খচক্রপদ্মগদাধরা ॥ ১০১॥

সঙ্কর্ষণসমুৎপন্না অম্বিকা সজ্জনাশ্রয়া ।

সুবৃতা সুন্দরী চৈব ধর্মকামার্থদাযিনী ॥ ১০২॥

মোক্ষদা ভক্তিনিলযা পুরাণপুরুষাদৃতা ।

মহাবিভূতিদাঽঽরাধ্যা সরোজনিলযাঽসমা ॥ ১০৩॥

অষ্টাদশভুজাঽনাদির্নীলোৎপলদলাক্ষিণী ।

সর্বশক্তিসমারূঢা ধর্মাধর্মবিবর্জিতা ॥ ১০৪॥

বৈরাগ্যজ্ঞাননিরতা নিরালোকা নিরিন্দ্রিযা ।

বিচিত্রগহনাধারা শাশ্বতস্থানবাসিনী ॥ ১০৫॥

জ্ঞানেশ্বরী পীতচেলা বেদবেদাঙ্গপারগা ।

মনস্বিনী মন্যুমাতা মহামন্যুসমুদ্ভবা ॥ ১০৬॥

অমন্যুরমৃতাস্বাদা পুরন্দরপরিষ্টুতা ।

অশোচ্যা ভিন্নবিষযা হিরণ্যরজতপ্রিযা ॥ ১০৭॥

হিরণ্যজননী ভীমা হেমাভরণভূষিতা ।

বিভ্রাজমানা দুর্জ্ঞেযা জ্যোতিষ্টোমফলপ্রদা ॥ ১০৮॥

মহানিদ্রাসমুৎপত্তিরনিদ্রা সত্যদেবতা ।

দীর্ঘা ককুদ্মিনী পিঙ্গজটাধারা মনোজ্ঞধীঃ ॥ ১০৯॥

মহাশ্রযা রমোৎপন্না তমঃপারে প্রতিষ্ঠিতা ।

ত্রিতত্ত্বমাতা ত্রিবিধা সুসূক্ষ্মা পদ্মসংশ্রযা ॥ ১১০॥

শান্ত্যতীতকলাঽতীতবিকারা শ্বেতচেলিকা ।

চিত্রমাযা শিবজ্ঞানস্বরূপা দৈত্যমাথিনী ॥ ১১১॥

কাশ্যপী কালসর্পাভবেণিকা শাস্ত্রযোনিকা ।

ত্রযীমূর্তিঃ ক্রিযামূর্তিশ্চতুর্বর্গা চ দর্শিনী ॥ ১১২॥

নারাযণী নরোৎপন্না কৌমুদী কান্তিধারিণী ।

কৌশিকী ললিতা লীলা পরাবরবিভাবিনী ॥ ১১৩॥

বরেণ্যাঽদ্ভুতমহাত্ম্যা বডবা বামলোচনা ।

সুভদ্রা চেতনারাধ্যা শান্তিদা শান্তিবর্ধিনী ॥ ১১৪॥

জযাদিশক্তিজননী শক্তিচক্রপ্রবর্তিকা ।

ত্রিশক্তিজননী জন্যা ষটসূত্রপরিবর্ণিতা ॥ ১১৫॥

সুধৌতকর্মণাঽঽরাধ্যা যুগান্তদহনাত্মিকা ।

সঙ্কর্ষিণী জগদ্ধাত্রী কামযোনিঃ কিরীটিনী ॥ ১১৬॥

ঐন্দ্রী ত্রৈলোক্যনমিতা বৈষ্ণবী পরমেশ্বরী ।

প্রদ্যুম্নজননী বিম্বসমোষ্ঠী পদ্মলোচনা ॥ ১১৭॥

মদোৎকটা হংসগতিঃ প্রচণ্ডা চণ্ডবিক্রমা ।

বৃষাধীশা পরাত্মা চ বিন্ধ্যা পর্বতবাসিনী ॥ ১১৮॥

হিমবন্মেরুনিলযা কৈলাসপুরবাসিনী ।

চাণূরহন্ত্রী নীতিজ্ঞা কামরূপা ত্রযীতনুঃ ॥ ১১৯॥

ব্রতস্নাতা ধর্মশীলা সিংহাসননিবাসিনী ।

বীরভদ্রাদৃতা বীরা মহাকালসমুদ্ভবা ॥ ১২০॥

বিদ্যাধরার্চিতা সিদ্ধসাধ্যারাধিতপাদুকা ।

শ্রদ্ধাত্মিকা পাবনী চ মোহিনী অচলাত্মিকা ॥ ১২১॥

মহাদ্ভুতা বারিজাক্ষী সিংহবাহনগামিনী ।

মনীষিণী সুধাবাণী বীণাবাদনতৎপরা ॥ ১২২॥

শ্বেতবাহনিষেব্যা চ লসন্মতিররুন্ধতী ।

হিরণ্যাক্ষী তথা চৈব মহানন্দপ্রদাযিনী ॥ ১২৩॥

বসুপ্রভা সুমাল্যাপ্তকন্ধরা পঙ্কজাননা ।
পরাবরা বরারোহা সহস্রনযনার্চিতা ॥ ১২৪॥

শ্রীরূপা শ্রীমতী শ্রেষ্ঠা শিবনাম্নী শিবপ্রিযা ।
শ্রীপ্রদা শ্রিতকল্যাণা শ্রীধরার্ধশরীরিণী ॥ ১২৫॥

শ্রীকলাঽনন্তদৃষ্টিশ্চ হ্যক্ষুদ্রাঽঽরাতিসূদনী ।
রক্তবীজনিহন্ত্রী চ দৈত্যসঙ্ঘবিমর্দিনী ॥ ১২৬॥

সিংহারূঢা সিংহিকাস্যা দৈত্যশোণিতপাযিনী ।
সুকীর্তিসহিতাচ্ছিন্নসংশযা রসবেদিনী ॥ ১২৭॥

গুণাভিরামা নাগারিবাহনা নির্জরার্চিতা ।
নিত্যোদিতা স্বযংজ্যোতিঃ স্বর্ণকাযা প্রকীর্তিতা ॥ ১২৮॥

বজ্রদণ্ডাঙ্কিতা চৈব তথাঽমৃতসঞ্জীবিনী ।
বজ্রচ্ছন্না দেবদেবী বরবজ্রস্ববিগ্রহা ॥ ১২৯॥

মাঙ্গল্যা মঙ্গলাত্মা চ মালিনী মাল্যধারিণী ।
গন্ধর্বী তরুণী চান্দ্রী খড্গাযুধধরা তথা ॥ ১৩০॥

সৌদামিনী প্রজানন্দা তথা প্রোক্তা ভৃগূদ্ভবা ।

একানঙ্গা চ শাস্ত্রার্থকুশলা ধর্মচারিণী ॥ ১৩১॥

ধর্মসর্বস্ববাহা চ ধর্মাধর্মবিনিশ্চযা ।

ধর্মশক্তির্ধর্মমযা ধার্মিকানাং শিবপ্রদা ॥ ১৩২॥

বিধর্মা বিশ্বধর্মজ্ঞা ধর্মার্থান্তরবিগ্রহা ।

ধর্মবর্ষ্মা ধর্মপূর্বা ধর্মপারঙ্গতান্তরা ॥ ১৩৩॥

ধর্মোপদেষ্ট্রী ধর্মাত্মা ধর্মগম্যা ধরাধরা ।

কপালিনী শাকলিনী কলাকলিতবিগ্রহা ॥ ১৩৪॥

সর্বশক্তিবিমুক্তা চ কর্ণিকারধরাঽক্ষরা।

কংসপ্রাণহরা চৈব যুগধর্মধরা তথা ॥ ১৩৫॥

যুগপ্রবর্তিকা প্রোক্তা ত্রিসন্ধ্যা ধ্যেযবিগ্রহা ।

স্বর্গাপবর্গদাত্রী চ তথা প্রত্যক্ষদেবতা ॥ ১৩৬॥

আদিত্যা দিব্যগন্ধা চ দিবাকরনিভপ্রভা ।

পদ্মাসনগতা প্রোক্তা খড্গবাণশরাসনা ॥ ১৩৭॥

শিষ্টা বিশিষ্টা শিষ্টেষ্টা শিষ্টশ্রেষ্ঠপ্রপূজিতা ।

শতরূপা শতাবর্তা বিততা রাসমোদিনী ॥ ১৩৮॥

সূর্যেন্দুনেত্রা প্রদ্যুম্নজননী সুষ্ঠুমাযিনী ।

সূর্যান্তরস্থিতা চৈব সৎপ্রতিষ্ঠিতবিগ্রহা ॥ ১৩৯॥

নিবৃত্তা প্রোচ্যতে জ্ঞানপারগা পর্বতাত্মজা ।

কাত্যাযনী চণ্ডিকা চ চণ্ডী হৈমবতী তথা ॥ ১৪০॥

দাক্ষাযণী সতী চৈব ভবানী সর্বমঙ্গলা ।

ধূম্রলোচনহন্ত্রী চ চণ্ডমুণ্ডবিনাশিনী ॥ ১৪১॥

যোগনিদ্রা যোগভদ্রা সমুদ্রতনযা তথা ।

দেবপ্রিযঙ্করী শুদ্ধা ভক্তভক্তিপ্রবর্ধিনী ॥ ১৪২॥

ত্রিণেত্রা চন্দ্রমুকুটা প্রমথার্চিতপাদুকা ।

অর্জুনাভীষ্টদাত্রী চ পাণ্ডবপ্রিযকারিণী ॥ ১৪৩॥

কুমারলালনাসক্তা হরবাহূপধানিকা ।

বিঘ্নেশজননী ভক্তবিঘ্নস্তোমপ্রহারিণী ॥ ১৪৪॥

সুস্মিতেন্দুমুখী নম্যা জযাপ্রিযসখী তথা ।

অনাদিনিধনা প্রেষ্ঠা চিত্রমাল্যানুলেপনা ॥ ১৪৫॥

কোটিচন্দ্রপ্রতীকাশা কূটজালপ্রমাথিনী ।

কৃত্যাপ্রহারিণী চৈব মারণোচ্চাটনী তথা ॥ ১৪৬॥

সুরাসুরপ্রবন্দ্যাঙ্ঘ্রির্মোহঘ্নী জ্ঞানদায়িনী ।

ষড্বৈরিনিগ্রহকরী বৈরিবিদ্রাবিণী তথা ॥ ১৪৭॥

ভূতসেব্যা ভূতদাত্রী ভূতপীডাবিমর্দিকা ।

নারদস্তুতচারিত্রা বরদেশা বরপ্রদা ॥ ১৪৮॥

বামদেবস্তুতা চৈব কামদা সোমশেখরা ।

দিক্পালসেবিতা ভব্যা ভামিনী ভাবদায়িনী ॥ ১৪৯॥

স্ত্রীসৌভাগ্যপ্রদাত্রী চ ভোগদা রোগনাশিনী ।

ব্যোমগা ভূমিগা চৈব মুনিপূজ্যপদাম্বুজা ।

বনদুর্গা চ দুর্বোধা মহাদুর্গা প্রকীর্তিতা ॥ ১৫০॥

ফলশ্রুতিঃ

ইতীদং কীর্তিদং ভদ্র দুর্গানামসহস্রকম্ ।

ত্রিসন্ধ্যং যঃ পঠেন্নিত্যং তস্য লক্ষ্মীঃ স্থিরা ভবেত্ ॥ ১॥

গ্রহভূতপিশাচাদিপীডা নশ্যত্যসংশযম্ ।

বালগ্রহাদিপীডাযাঃ শান্তির্ভবতি কীর্তনাত্ ॥ ২॥

মারিকাদিমহারোগে পঠতাং সৌখ্যদং নৃণাম্ ।
ব্যবহারে চ জয়দং শত্রুবাধানিবারকম্ ॥ ৩॥

দম্পত্যোঃ কলহে প্রাপ্তে মিথঃ প্রেমাভিবর্ধকম্ ।
আয়ুরারোগ্যদং পুংসাং সর্বসম্পৎপ্রদায়কম্ ॥ ৪ ॥

বিদ্যাভিবর্ধকং নিত্যং পঠতামর্থসাধকম্ ।
শুভদং শুভকার্যেষু পঠতাং শৃণুতামপি ॥ ৫॥

যঃ পূজয়তি দুর্গাং তাং দুর্গানামসহস্রকৈঃ ।
পুষ্পৈঃ কুঙ্কুমসম্মিশ্রৈঃ স তু যৎকাঙ্ক্ষতে হৃদি ॥ ৬॥

তৎসর্বং সমবাপ্নোতি নাস্তি নাস্ত্যত্র সংশয়ঃ ।
যন্মুখে ধ্রিয়তে নিত্যং দুর্গানামসহস্রকম্ ॥ ৭॥

কিং তস্যেতরমন্ত্রৌঘৈঃ কার্যং ধন্যতমস্য হি ।
দুর্গানামসহস্রস্য পুস্তকং যদ্গৃহে ভবেত্ ॥ ৮॥

ন তত্র গ্রহভূতাদিবাধা স্যান্মঙ্গলাস্পদে ।
তদ্গৃহং পুণ্যদং ক্ষেত্রং দেবীসান্নিধ্যকারকম্ ॥ ৯॥

এতস্য স্তোত্রমুখ্যস্য পাঠকঃ শ্রেষ্ঠমন্ত্রবিত্ ।

দেবতায়াঃ প্রসাদেন সর্বপূজ্যঃ সুখী ভবেত্ ॥ ১০॥

ইত্যেতন্নগরাজেন কীর্তিতং মুনিসত্তম ।

গুহ্যাদ্গুহ্যতরং স্তোত্রং ত্বয়ি স্নেহাত্ প্রকীর্তিতম্ ॥ ১১॥

ভক্তায় শ্রদ্দধানায় কেবলং কীর্ত্যতামিদম্ ।

হৃদি ধারয় নিত্যং ত্বং দেব্যনুগ্রহসাধকম্ ॥ ১২॥

॥ ইতি শ্রীস্কান্দপুরাণে স্কন্দনারদসংবাদে

দুর্গাসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

Encoded by Kirk Wortman kirkwort@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Durga Sahasranama Stotram 1 Lyrics in Bengali PDF
% File name : durgaasahasra.itx
% Category : sahasranAma
% Location : doc_devii
% Language : Sanskrit
% Subject : hinduism/religion

% Transliterated by : Kirk Wortman"
% Proofread by : Kirk Wortman"
% Description-comments : skandapuraaNa
% Latest update : August 13, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website